## २१ एकविंश दशकः - नन्दसुतावतारः

सर्वेऽपि जीवा निजकर्म बद्धा एते षडासन्द्रुहिणस्य पौत्राः ।
तन्निन्दया दैत्यकुले प्रजाताः पुनश्च शप्ता जनकेन दैवात् ॥ २१-१॥

तेनैव ते शौरि सुतत्वं आप्ता हताश्च कंसेन तु जातमात्राः ।
श्रीनारदेन र्षिवरेण देवि ज्ञातं पुरावृत्त मिदं समस्तम् ॥ २१-२॥

प्राग्दम्पती चादिति कश्यपौ हा स्वकर्म दोषेण पुनश्च जातौ ।
तौ देवकी शूर सुतौ स्वपुत्र नाशादिभि र्दुःख मवापतुश्च ॥ २१-३॥

त्वं देवकी सप्तम गर्भतो वै गृह्णन्त्यनन्तांश शिशुं स्वशक्त्या ।
निवेश्य रोहिण्युदरे धरण्यां मर्त्यो भवेत्यच्युत मादिशश्च ॥ २१-४॥

प्राक्कर्म दोषात्स सुहृन्मघोनः क्रुद्धेन शप्तो भृगुणा मुरारिः ।
दयार्ह संसारि दशा मवाप्स्यन् हा देवकी गर्भ मथा विवेश ॥ २१-५॥

पूर्णे तु गर्भे हरि रर्द्धरात्रे कारागृहे देवक नन्दनायाः ।
जज्ञे सुतेष्वष्टमता मवाप्तः शौरि र्विमुक्तो निगडैश्च बन्धात् ॥ २१-६॥

व्योमोत्थ वाक्येन तवैव बालं गृह्णन्नदृष्टः खलु गेहपालैः ।
निद्रां गतैस्त्व द्विवृतेन शौरिः द्वारेण यातो बहिरात्त तोषम् ॥ २१-७॥

त्वं स्वेच्छया गोपकुले यशोदा नन्दात्मजा स्वापित जीवजाले ।
अजायथा भक्तजनार्ति हन्त्री सर्वं नियन्त्री सकलार्थदात्री ॥ २१-८॥

** या देवी सर्व भूतेषु निद्रा रूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ **

तव प्रभावा द्वसुदेव एको गच्छन्नभीतो यमुना मयत्नम् ।
तीर्त्वा नदीं गोकुल माप तत्र दास्याः करे स्वं तनयं ददौ च ॥ २१-९॥

तयैव दत्ता मथ बालिकां त्वां आदाय शीघ्रं स ततो निवृत्तः ।
कारागृहं प्राप्य ददौ प्रियायै स चाभवत्पूर्वव देव बद्धः ॥ २१-१०॥

त्वद्रोद नोत्थापित गेहपालैः निवेदितो भोजपतिः समेत्य ।
त्वां पादयुग्म ग्रहणेन कुर्वन् अधःशिरस्कां निरगाद्गृहान्तात् ॥ २१-११॥

स पोथयामास शिलातले त्वां सद्यः समुत्पत्य करा दमुष्य ।
दिवि स्थिता शङ्ख गदादि हस्ता सुरैः स्तुता स्मेरमुखी त्वमात्थ ॥ २१-१२॥

वधेन किं मे तव कंस जातः तवान्तकः क्वाप्य विदूरदेशे ।
मा द्रुह्यतां साधुजनो हितं स्वं विचिन्तये त्युक्तवती तिरोऽभूः ॥ २१-१३॥

स भोजराट् स्वान्तक नाशनाय सर्वान् शिशून् हन्तुमरं बलिष्ठान् ।
वत्साघ मुख्या नसुरान्नियुज्य कृतार्थ मात्मान ममन्यतोच्चैः ॥ २१-१४॥

कंसोऽस्ति मे चेतसि काम लोभ क्रोधादि मन्त्रि प्रवरैः समेतः ।
सद्भावहन्ता खलु नन्दपुत्रि तं नाशय त्वच्चरणं नमामि ॥ २१-१५॥